सप्तदशः पाठः

# चाणक्यनीतिः



संस्कृतसाहित्ये नैतिकोपदेशानां दीर्घपरम्परा विद्यते । नीतिवचनानि व्यवहार–ज्ञानमहाक्षेत्रे महार्घ्यरत्नानि सन्ति। अस्माकं जीवनस्य मूल्याङ्कनं नैतिकमूल्येनैव भवति। चणकपुत्रः चाणक्यः महान् नीतिज्ञः आसीत्। 'कौटिल्यमहामात्यविष्णुगुप्त' इति नाम्ना सः प्रसिद्धः। पाठेऽस्मिन् तस्य 'चाणक्यनीतिरिति' ग्रन्थतः श्लोकाः उद्धृताः।

*सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।*
*सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥1॥*

**अन्वयः** - पृथ्वी सत्येन धार्यते, रविः सत्येन तपते, वायुः सत्येन वाति, सर्वं च सत्ये प्रतिष्ठितम् (अस्ति)।

**शब्दार्थः** -

| | | |
|---|---|---|
| धार्यते | - | धारण की जाती है |
| तपते | - | उष्णता प्रदान करता है |
| वाति | - | बहता है |
| प्रतिष्ठितम् | - | स्थित है |

*मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।*
*मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत् ॥2॥*

**अन्वयः** - मनसा चिन्तितं कार्यं वाचा न एव प्रकाशयेत्, गूढं मन्त्रेण रक्षयेत्। कार्ये च अपि नियोजयेत्।

**शब्दार्थः** -

| | | |
|---|---|---|
| मनसा | - | मन के द्वारा |
| वाचा | - | वाणी के द्वारा |
| प्रकाशयेत् | - | प्रकट करना चाहिए |
| गूढम् | - | गोपनीय |
| मन्त्रेण | - | विचारपूर्वक |
| नियोजयेत् | - | लगाना चाहिए |

*पुत्राश्च विविधैः शीलैर्नियोज्याः सततं बुधैः ।*
*नीतिज्ञाः शीलसम्पन्ना भवन्ति कुलपूजिताः ॥3॥*

**अन्वयः** - बुधैः पुत्राः विविधैः शीलैः सततं नियोज्याः। (यतो हि) शीलसम्पन्नाः नीतिज्ञाः कुलपूजिताः भवन्ति।

**शब्दार्थः** -

| | | |
|---|---|---|
| बुधैः | - | विद्वानों के द्वारा |
| शीलैः | - | सदाचरणों के द्वारा |
| नियोज्याः | - | लगाना चाहिए |
| नीतिज्ञाः | - | नीतिशास्त्र को जानने वाले |
| कुलपूजिताः | - | कुल में सम्मानित/जनसमूह में पूजित |

***को हि भारः समर्थानां किं दूरं व्यवसायिनाम् ।***

***को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥4॥***

**अन्वयः** - हि समर्थानां कः भारः ? व्यवसायिनां किं दूरम् ? सविद्यानां कः विदेशः ? प्रियवादिनां कः परः ? (अर्थात् कोऽपि नास्ति)।

**शब्दार्थः** -

| | | |
|---|---|---|
| समर्थानाम् | - | सक्षम लोगों के लिए |
| व्यवसायिनाम् | - | उद्यमशील लोगों के लिए |
| सविद्यानाम् | - | विद्या से युक्त लोगों के लिए |
| परः | - | शत्रु/पराया |

***दरिद्रता धीरतया विराजते,***

***कुवस्त्रता शुभ्रतया विराजते ।***

***कदन्नता चोष्णतया विराजते,***

***कुरूपता शीलतया विराजते ॥5॥***

**अन्वयः** - दरिद्रता धीरतया विराजते, कुवस्त्रता शुभ्रतया विराजते, कदन्नता उष्णतया विराजते, कुरूपता च शीलतया विराजते ।

**शब्दार्थः** -

| | | |
|---|---|---|
| धीरतया | - | धैर्य धारण करने से |
| कदन्नता | - | निम्न कोटि का अन्न |
| विराजते | - | सुशोभित होता/होती है |

***धनहीनो न हीनश्च धनिकः सः सुनिश्चयः ।***

***विद्यारत्नेन यो हीनः सः हीनः सर्ववस्तुषु ॥6॥***

**अन्वयः** - यः धनहीनः सः हीनः न, (अपितु) सः सुनिश्चयः धनिकः, यः विद्यारत्नेन हीनः सः सर्ववस्तुषु हीनः (अस्ति)।

**शब्दार्थः** -

| | | |
|---|---|---|
| धनहीनः | - | धन से रहित |
| सुनिश्चयः | - | निश्चयपूर्वक |
| सर्ववस्तुषु | - | सभी वस्तुओं में |

***कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।***

***तथापि सुधियश्चार्याः सुविचार्यैव कुर्वते ॥7॥***

**अन्वयः** - पुंसां कर्मायत्तं फलम्, बुद्धिः कर्मानुसारिणी, तथापि सुधियः आर्याः च सुविचार्य एव कुर्वते ।

**शब्दार्थः** -

| | | |
|---|---|---|
| पुंसाम् | - | मनुष्यों का |
| कर्मायत्तम् | - | कर्म के अनुसार |
| सुधियः | - | विद्वान् लोग |
| आर्याः | - | श्रेष्ठ लोग |
| कुर्वते | - | करते हैं |

***छिन्नोऽपि चन्दनतरुर्न जहाति गन्धं,***

***वृद्धोऽपि वारणपतिर्न जहाति लीलाम् ।***

***यन्त्रार्पितो मधुरतां न जहाति चेक्षुः,***

***दीनोऽपि न त्यजति शीलगुणान् कुलीनः ॥8॥***

**अन्वयः** - छिन्नः चन्दनतरुः अपि गन्धं न जहाति, वृद्धः वारणपतिः अपि लीलां न जहाति, यन्त्रार्पितः इक्षुः मधुरतां न जहाति, कुलीनः च दीनः अपि शीलगुणान् न त्यजति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| छिन्नः | - | कटा हुआ |
| जहाति | - | छोड़ता है |
| वारणपतिः | - | हाथियों का स्वामी |
| यन्त्रार्पितः | - | यन्त्र (कोल्हू) में डाला गया |
| इक्षुः | - | गन्ना |
| शीलगुणान् | - | सच्चरित्रादि गुणों को |
| त्यजति | - | छोड़ता है |

***एकेनाऽपि सुपुत्रेण विद्यायुक्तेन साधुना ।***

***आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ॥9॥***

**अन्वयः** - एकेन सुपुत्रेण विद्यायुक्तेन साधुना अपि सर्वं कुलम् आह्लादितं, यथा चन्द्रेण शर्वरी (आह्लाद्यते)।

**शब्दार्थः** -

| | | |
|---|---|---|
| सुपुत्रेण | - | सद्गुणी पुत्र के द्वारा |
| साधुना | - | सज्जन के द्वारा |
| आह्लादितम् | - | प्रसन्न किया गया |
| शर्वरी | - | रात्रि |

***परोपकरणं येषां जागर्ति हृदये सताम् ।***

***नश्यन्ति विपदस्तेषां सम्पदः स्युः पदे-पदे ॥10॥***

**अन्वयः** - येषां सतां हृदये परोपकरणं जागर्ति तेषां विपदः नश्यन्ति, पदे-पदे सम्पदः स्युः ।

**शब्दार्थः** -

| | | |
|---|---|---|
| सताम् | - | सज्जनों के |
| परोपकरणम् | - | दूसरों का भला करना |
| जागर्ति | - | जागृत रहता है |
| विपदः | - | विपत्तियाँ |
| पदे-पदे | - | कदम-कदम पर |
| स्युः | - | हों |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) रविः केन तपते ?

(ख) दरिद्रता कया विराजते ?

(ग) कर्मानुसारिणी का ?

(घ) केन शर्वरी आह्लादिता ?

(ङ) कुरूपता कया विराजते ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) वाचा किं न प्रकाशयेत् ?

(ख) कैः पुत्राः विविधैः शीलैः नियोज्याः ?

(ग) कः सर्ववस्तुषु हीनः ?

(घ) कुलीनः दीनोऽपि कान् न त्यजति ?

(ङ) छिन्नोऽपि चन्दनतरुः किं न जहाति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) सत्येन सर्वं कथं प्रतिष्ठितम् ?

(ख) किमर्थं बुधैः पुत्राः विविधैः शीलैः नियोज्याः ?

(ग) पदे-पदे केषां सम्पदः स्युः ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(गूढम्, सत्ये, धनहीनो, लीलाम्, सविद्यानाम्)

(क) सर्वं ........................ प्रतिष्ठितम्।

(ख) मन्त्रेण रक्षयेद् .............................।

(ग) को विदेशः ............................।

(घ) ............................. न हीनश्च।

(ङ) वृद्धोऽपि वारणपतिर्न जहाति ........................।

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) दरिद्रता | इक्षुः |
| (ख) कदन्नता | शीलतया |
| (ग) कुवस्त्रता | धीरतया |
| (घ) कुरूपता | उष्णतया |
| (ङ) मधुरताम् | शुभ्रतया |

6. **शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षम् "न" इति लिखत –**

(क) सत्येन वायुः वाति। ☐

(ख) प्रियवादिनां कोऽपि न परः । ☐

(ग) कदन्नता उष्णतया न विराजते। ☐

(घ) कर्मायत्तं पुंसां फलम्। ☐

(ङ) छिन्नः चन्दनतरुः गन्धं जहाति। ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनञ्च लिखत –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – पुत्राः | पुत्र | प्रथमा | बहुवचनम् |
| (क) सत्येन | | | |
| (ख) समर्थानाम् | | | |
| (ग) मधुरताम् | | | |
| (घ) हृदये | | | |

8. **निम्नलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत –**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| यथा – भवन्ति | भू (भव्) | लट् | प्रथमपुरुषः | बहुवचनम् |
| (क) धार्यते | | | | |
| (ख) रक्षयेत् | | | | |
| (ग) विराजते | | | | |
| (घ) स्युः | | | | |

9. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत –**

| पदम् | | विच्छेदः | सन्धिनाम |
|---|---|---|---|
| यथा –वायुश्च | = | वायुः + च | विसर्गसन्धिः |
| (क) कर्मानुसारिणी | | | |
| (ख) वृद्धोऽपि | | | |
| (ग) एकेनाऽपि | | | |
| (घ) विपदस्तेषाम् | | | |

**10. अधोलिखितसमासानां विग्रहं कृत्वा समासनाम लिखत -**

यथा -धनहीन: धनेन हीन: तृतीया तत्पुरुष:

(क) सविद्यानाम्

(ख) वारणपति:

(ग) कुलपूजिता:

(घ) विद्यारत्नेन

**11. प्रदत्तश्लोकान्वयस्य पूर्तिं कुरुत -**

बुधै: ............ विविधै: शीलै: ..................... । (यतो हि)

..................... नीतिज्ञा: ................... भवन्ति ।

## योग्यताविस्तार: -

- पाठे समागतान् श्लोकान् कण्ठस्थं कुरुत ।
- ''चाणक्यनीतिः'' इत्यस्मात् पुस्तकात् चित्वा (पाठे समागतान् श्लोकान् विहाय) अन्यान् दशश्लोकान् लिखत ।
- चाणक्येन विरचितानि अन्यानि पुस्तकानि पठत ।
- चाणक्येतरदशनीतिश्लोकान् लिखत ।